# श्री स्तुतिः

मानाती तप्रथित विभवां  मङ्गलं मङ्गलानां
वक्षःपीठं मधुवि जयिनो भूषयन्तीं स्वकान्त्या ।
प्रत्यक्षानु श्रविक महिम प्रार्थिनीनां प्रजानां
श्रेयोमूर्तिं श्रियम शरणस्त्वां शरण्यां प्रपद्ये ॥ १॥

आविर्भावः कलश जलधा वध्वरे वाऽपि यस्याः
स्थानं यस्याः सरसिज वनं विष्णु वक्षःस्थलं वा ।
भूमा यस्या भुवन मखिलं देवि दिव्यं पदं वा
स्तोकप्रज्ञै रनवधि गुणा स्तूयसे सा कथं त्वम् ॥ २॥

स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमाना
तामेव त्वा मनितर गतिः स्तोतु माशंसमानः ।
सिद्धारम्भः सकल भुवन श्लाघनीयो भवेयं
सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात् ॥ ३॥

यत्सङ्कल्पाद् भवति कमले यत्र देहिन्यमीषां
जन्मस्थेम प्रलय रचना जङ्गमा जङ्गमानाम् ।
तत्कल्याणं किमपि यमिना मेक लक्ष्यं समाधौ
पूर्णं तेजः स्फुरति भवती पाद लाक्षारसाङ्कम् ॥ ४॥

निष्प्रत्यूह प्रणय घटितं देवि नित्यानपायं
विष्णुस्त्वं चे त्यनवधि गुणं द्वन्द्व मन्योन्य लक्ष्यम् ।
शेषश्चित्तं विमल मनसां मौलयश्च श्रुतीनां

सम्पद्यन्ते विहरण विधौ यस्य शय्या विशेषाः ॥ ५॥

उद्देश्यत्वं जननि भजतोर् उज्झितो पाधि गन्धं
प्रत्यग्रूपे हविषि युवयोर् एक शेषित्व योगात् ।
पद्मे पत्युस्तव च निगमै र्नित्य मन्विष्य माणो
नावच्छेदं भजति महिमा नर्तयन् मानसं नः ॥ ६॥

पश्यन्तीषु श्रुतिषु परितः सूरि वृन्देन सार्धं
मध्ये कृत्य त्रिगुण फलकं निर्मित स्थान भेदम् ।
विश्वाधीश प्रणयिनि सदा विभ्रम द्यूत वृत्तौ
ब्रह्मेशाद्या दधति युवयोर् अक्षशार प्रचारम् ॥ ७॥

अस्येशाना त्वमसि जगतः संश्रयन्ती मुकुन्दं
लक्ष्मीः पद्मा जलधि तनया विष्णु पत्नीन्दिरेति ।
यन्नामानि श्रुति परिपणान् येव मावर्तयन्तो
नावर्तन्ते दुरित पवन प्रेरिते जन्मचक्रे ॥ ८॥

त्वामेवाहुः कतिचि दपरे त्वत्प्रियं लोक नाथं
किं तैरन्तः कलह मलिनैः किञ्चि दुत्तीर्य मग्नैः ।
त्वत्सम्प्रीत्यै विहरति हरौ सम्मुखीनां श्रुतीनां
भावारूढौ भगवति युवां दम्पती दैवतं नः ॥ ९॥

आपन्नार्ति प्रशमन विधौ बद्ध दीक्षस्य विष्णोः
आचख्युस्त्वां प्रिय सहचरीं ऐकम त्योपपन्नाम् ।
प्रादुर्भावै रपि समतनुः प्राध्व मन्वीयसे त्वं

दूरोत्क्षिप्तै रिव मधुरता दुग्धराशे स्तरङ्गैः ॥ १०॥

धत्ते शोभां हरि मरकते तावकी मूर्तिराद्या
तन्वी तुंगस्तन भर नता तप्त जाम्बून दाभा ।
यस्यां गच्छन्त्युदय विलयैर् नित्य मानन्द सिन्धौ
इच्छा वेगोल्लसित लहरी विभ्रमं व्यक्तयस्ते ॥ ११॥

आसंसारं वितत मखिलं वाङ्मयं यद्विभूतिः
र्यद्भ्रू भङ्गात्कुसुम धनुषः किङ्करो मेरूधन्वा ।
यस्यां नित्यं नयन शतकैर् एकलक्ष्यो महेन्द्रः
पद्मे तासां परिणति रसौ भाव लेशैस्त्वदीयैः ॥ १२॥

अग्रे भर्तुः सरसिज मये भद्रपीठे निषण्णां
अम्भोराशे रधिगत सुधा सम्प्लवा दुत्थितां त्वाम् ।
पुष्पासार स्थगित भुवनैः पुष्कला वर्तकाद्यैः
क्लृप्ता रम्भाः कनक कलशै रभ्यषिञ्चन् गजेन्द्राः ॥ १३॥

आलोक्यत्वा ममृत सहजे विष्णु वक्षःस्थलस्थां
शापा क्रान्ताः शरण मगमन् सावरोधाः सुरेन्द्राः ।
लब्ध्वा भूयस्त्रिभुवन मिदं लक्षितं त्वत्कटाक्षैः
सर्वाकार स्थिर समुदयां सम्पदं निर्वि शन्ति ॥ १४॥

आर्तत्राण व्रतिभि रमृता सार नीलाम्बु वाहैः
अम्भोजाना मुषसि मिषतां अन्तरङ्गै रपाङ्गैः ।
यस्यां यस्यां दिशि विहरते देवि दृष्टिस्त्वदीया

तस्यां तस्या मह महमिकां तन्वते सम्पदोघाः ॥ १५॥

योगारम्भ त्वरित मनसो युष्म दैकान्त्ययुक्तं
धर्मं प्राप्तुं प्रथम मिह ये धारयन्तेऽ धनायाम् ॥
तेषां भूमे र्धनपति गृहा दम्बुधेर्वा प्रकामं
धारा निर्यान्त्यधिक मधिकं वाञ्छितानां वसूनाम् ॥ १६॥

श्रेयस्कामा यमल निलये चित्र माम्नाय वाचां
चूडापीडं तव पदयुगं चेतसा धारयन्तः ।
छत्रच्छाया सुभग शिरस श्चामर स्मेर पार्श्वाः
श्लाघा शब्द श्रवण मुदिताः स्रग्विणः सञ्चरन्ति ॥ १७॥

ऊरीकर्तुं कुशल मखिलं जेतु मादीन रातीन्
दूरीकर्तुं दुरित निवहं त्यक्तु माद्याम विद्याम् ।
अम्ब स्तम्बा वधिक जनन ग्राम सीमान्त रेखाम्
आलम्बन्ते विमल मनसो विष्णु कान्ते दया ते ॥ १८॥

जाताकांक्षा जननि युवयोर् एक सेवाधिकारे
मायालीढं विभव मखिलं मन्यमाना स्तृणाय ।
प्रीत्यै विष्णो स्तव च कृतिनः प्रीतिमन्तो भजन्ते
वेला भङ्ग प्रशमन फलं वैदिकं धर्म सेतुम् ॥ १९॥

सेवे देवि त्रिदश महिला मौलि मालार्चितं ते
सिद्धि क्षेत्रं शमित विपदां सम्पदां पाद पद्मम् ।
यस्मिन्नीषन् नमित शिरसो यापयित्वा शरीरं

वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः ॥ २०॥

सानु प्रास प्रकटित दयैः सान्द्र वात्सल्य दिग्धैः
अम्बस्निग्धै रमृत लहरी लब्ध स ब्रह्मचर्यैः ।
घर्मे तापत्रय विरचिते गाढ तप्तं क्षणं माम्
आकिञ्चन्य ग्लपित मनघैर् आद्रियेथाः कटाक्षैः ॥ २१॥

सम्पद्यन्ते भवभय तमी भानवस्त्व त्प्रसादात्
भावाः सर्वे भगवति हरौ भक्ति मुद्वेलयन्तः ।
याचे किंत्वा महमिह यतः शीतलोदार शीला
भूयो भूयो दिशसि महतां मङ्गलानां प्रबन्धान् ॥ २२॥

माता देवि त्वमसि भगवान् वासुदेवः पिता मे
जातः सोऽहं जननि युवयोर् एक लक्ष्यं दयायाः ।
दत्तो युष्मत्परिजन तया देशिकै रप्यतस्त्वं
किं ते भूयः प्रियमिति किल स्मेर वक्त्रा विभासि ॥ २३॥

कल्याणाना मविकल निधिः काऽपि कारुण्य सीमा
नित्यामोदा निगम वचसां मौलि मन्दार माला ।
सम्पद्दिव्या मधु विजयिनो सन्निधत्तां सदा मे
सैषा देवी सकल भुवन प्रार्थना कामधेनुः ॥ २४॥

उपचित गुरु भक्ते रुत्थितं वेङ्कटेशात्
कलि कलुष निवृत्त्यै कल्प्यमानं प्रजानाम् ।
सरसिज निलयायाः स्तोत्र मेतत्पठन्तः

सकल कुशल सीमा सार्वभौमा भवन्ति ॥ २५॥

कवितार्किक सिंहाय कल्याण गुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्त गुरवे नमः ॥

॥ इति श्रीवेदान्त देशिक विरचिता श्रीस्तुतिः सम्पूर्णा ॥